अध्याय : २४ chapter-24

नारद उवाच ।।

एवं श्रुतवा सभार्यश्च स प्रमोदप्लुतमानसः ।।
प्रणम्य मामिति प्राह यथैवं पुण्यवानहम् ।। १

पुनः किंचित्प्रवक्षयामि पुत्र्या मे दक्षिणः करः ।।
उत्तानः कारणं किं तच्छ्रोतुमिच्छामि नारदः ।। २

इति पृष्टो/स्मि शैलेन प्रोवाचं कारणं तदा ।।
सर्व दैव करो ह्यस्याः सर्वेषां प्राणिनां प्रति ।। ३

अभयस्य प्रदाता/सावृत्तानस्तु करस्ततः ।।
एषा भार्या जगद्भर्तुर्वृषांकस्य महीधर ।। ४

जननी सर्वलोकस्य भाविनी भूतभाविनी ।।
तद्यथा शीघ्रमेवैषा योगं यातु[1] पिनाकिना ।। ५

त्वया विधेयं विधिवत्तथा शैलेन्द्रसत्तम् ।।
अस्त्यत्र सुमहत्कार्यं देवानां हिम भूधर ।। ६

इति प्रोच्य तमापृच्छ्य प्रावोचं वासवाय तत् ।।
मम भूयस्तु कर्तव्यं तन्मया कृतमेव हि[2] ।। ७

---

१ अ. याति

२ अ. "च" पाठः ।

किं तु पंचशरः प्रेर्य कार्यशेषोऽत्र वासव ।।
इत्यादिश्य गतश्चाहं तारकं प्रति फाल्गुन[१] ।। ८

कलप्रियत्वात्तस्यैनमर्थं कथयितुं स्फुटम् ।।
हैमाद्रिरपि मे वाक्य प्रेरितः पार्वतीं प्रति[२] ।। ९

भवस्याराधनां कर्तुं ससखीमादिशत्तदा ।।
सा तं परिचचारेशं तस्या [३]दृष्ट्वा सुशीलताम् ।। १०

पुष्पतोयफलार्थानि नियुक्ता पार्वती व्यधात् ।।
महेन्द्रोपि च मद्वाक्यात्स्मरं सस्मार भारत ।। ११

स च तत्स्मरणं ज्ञात्वा वसंतरति संयुतः ।।
चूतांकुरास्त्रः सहसा प्रादुरासीन्मनोभवः ।। १२

तमाह च वचो धीमान्स्मयन्निव च तं स्पृशन् ।।
उपदेशेन बहुना किं त्वां प्रति रतिप्रिय ।। १३

चित्ते वससि तेन त्वं वेत्सि भूतमनोगतम् ।।
तथापि त्वां वदिष्यामि स्वकार्य परतां स्मरन् ।। १४

---

१ ब. नः

२ अ. प्रतौ "तदा"

३ "दृष्ट्वा सुशीलताम्" अ. नष्ट पृष्ठाः प्रतिः ।

३ "च" अ. प्रतौ नास्ति ।

ममैकं सुमहत्कार्यं कर्तुमर्हसि मन्मथ ।।
महेश्वरं कृपानाथं सतीभार्या वियोजितम् ।। १५

संयोजय पुनर्देव्या हिमाद्रिगृहजातया ।।
देवी देवश्च तुष्टौ ते[१] करिष्येते[२] [३]इहेप्सितम् ।। १६

मदन उवाच ।।
अलीकमेतद्देवेन्द्र स हि देवस्तपोरतिः ।।
[४]नान्यासादयितव्यानि तेजांसि मनुरब्रवीत् ।। १७

वेदान्तेषु च मां विप्रा गर्हयंति पुनः पुनः ।।
महाशनो महापाप्मा कामो[५]यम नरोमहान् ।। १८

आवृतं ज्ञानमेतेन ज्ञानिनां नित्यवैरिणा ।।
तस्मादयं सदा त्याज्यः कामोऽहिरिव सत्तमैः ।। १९

एवं शीलस्य मे कस्मात्प्रतुष्यति महेश्वरः ।।
मद्यपस्येव पापस्य वासुदेवो जगद्गुरुः ।। २०

इंद्र उवाच ।।
मैवं ब्रूहि महाभाग त्वां विनाकः पुमान्भुवि ।।
धर्ममर्थं तथा कामं मोक्षं वा प्राप्तुमीश्वरः ।। २१

---

१ अ. तौ
२ अ. मेते
३ ब. महे
४ ब. नात्यासि
५ अ. क्रोधा

यत्किंचित्साध्यते लोके मूलं तस्य च कामना ।।
कथं कामं विनिंदंति तस्मात्ते मोक्षसाधकाः[१] ।। २२

सत्यं चापि श्रुतेर्वाक्यं तव स्वरूपं त्रिधागतम् ।।
तामसं राजसं चैव सात्त्विकं चापि मन्मथ ।। २३

अमुक्तितः[२] कामनया स्वरूपं तत्तामसं तव ।।
सुखबुद्धया स्पृहा या च स्वरूपं तद्राजसं तव ।। २४

केवलं यावदर्थार्थि तद्रूपं सात्त्विकं तव ।।
तत्त्वे रूपत्रयमिदं ब्रूहि नोपासते हि[३] के ।। २५

त्वं साक्षात्परमः पूज्यः कुरु कार्यमिदं हिनः ।।
अथ वा पीडितान्दृष्ट्वा सामान्यानपि पंडिताः[४] ।। २६

इति संचिंत्य कार्यं त्वं सर्वथाकुरु तत्फुटम् ।। २७

इत्या कर्ण्य तथेत्युक्ता वसंत श्रीरति संयुतः ।।
पिकादि सैन्य संपन्नो हिमाद्रिं[५] प्रययौ स्मरः ।। २८

---

१ ब. सार्थक

२ अं. आयुक्तितं

३ अ. यः

४ अ. पंडितान्

५ ब. हिमाद्री

तत्रापश्यत स शंभोः[१] स पुण्यमाश्रममंडलम् ।।
नानावृक्ष समाकीर्णं शांतसत्त्व समाकुलम् ।। २९

तत्रापश्यत्त्रिनेत्रस्य वीरकं नाम द्वारपम् ।।
यथा साक्षान्महेशानं गणांश्चाप्युतशी/स्य च ।। ३०

ददर्श[२] च महेशानं नासाग्रकृतलोचनम् ।।
देवदारु द्रुमच्छायावेदिका मध्यमाश्रितम् ।।
समकायं सुखासीनं समाधिस्थं महेश्वरम् ।। ३१

निस्तरंग विनिर्गृह्य स्थितमिंद्रीय गोचरान् ।।
आत्मानमात्मना देवं प्रविष्टं तपसो निधिम् ।। ३२

तं तथा विधमालोक्य सौंतर्भेदाय यत्नवान् ।।
भ्रमरध्वनिव्याजेन विवश मदनो मनः ।। ३३

एतस्मिन्नंतरे देवो विकासित विलोचनः ।।
सस्मार नगराजस्य तनयां रक्तमानसः ।। ३४

निवेदिता वीरकेण[३] विवेश च गिरेः सुता ।।
[४]तस्मिन्काले महाभागा सदायद्रुदुषेति सा ।। ३५

---

१ ब. शंभो
२ अ. दर्श
३ अ. केन
४ ब. यस्मिन्काले

ततस्तस्यां मनः स्वीयमनुरक्तमवेक्ष्य च ।।
निगृह्य लीलया देवः स्वकं पृष्ठमवैक्षत ।।
तावदापूर्ण धनुष्काम पश्यत् रतिप्रियम् ।। ३६

तन्नाश कृपया देवो नानास्थानेषु सोऽगमत् ।।
तावत्पश्यति पृष्ठस्थमाकृष्य[1] धनुषः[2] शरम् ।। ३७

स नदीः[3] पर्वतांश्चैव आश्रमान्सरसीस्तथा ।।
परिभ्रमन्महादेवः पृष्ठस्थं तमवैक्षत ।। ३८

जगत्त्रयं परिभ्रम्य पुनरागात्स्वमाश्रमम् ।।
पृष्ठस्थमेव तं वीक्ष्य निःश्वासं मुमुचे हरः ।। ३९

ततस्तृतीयनेत्रोत्थवह्निना नाकवासिनाम् ।।
क्रोशतां गमितः कामो भस्मत्वं पांडुनंदन ।। ४०

स तु[4] तं भस्मसात्कृत्वा हरनेत्रोद्भवोऽनलः ।।
व्यजृंभत जगद्गृधुं ज्वाला पूरितदिङ्मुखः ।। ४१

ततो भवो जगद्धेतोर्व्य भज्जात वेदसम् ।।
साहंकारे जने चंद्रे सुमनस्सु च गीतके ।। ४२

---

१ ब. कर्ण
२ अ. धनुर्णां
३ ब. नदी
४ अ. च पाठः ।

भृंगेषु कोकिलास्येषु विहारेषु स्मरानलम् ।।
तत्प्राप्तौ स्नहे संयुक्तं कामिनां त्वदयं किल ।। ४३

ज्वालयत्यनिशं सो/ग्निर्दुश्चिकित्स्यो/सुखावहः ।।
विलोक्य हरनिः श्वासज्वाला भस्मीकृतं स्मरम् ।। ४४

विललाप रतिर्दीना मधुना बंधुना सह ।।
विलपंती सुबहुशो मधुना परिसांत्विता ।। ४५

रत्याः प्रलापमाकर्ण्य देवदेवो वृषध्वजः ।।
कृपया परया प्राह काम पत्नीं निरीक्ष्य च ।। ४६

अमूर्तो/पि ह्ययं भद्रे कार्यं सर्वं पतिस्तव ।।
रतिकाले ध्रुवं बाले करिष्यति न संशयः ।। ४७

यदा[१] विष्णुश्च भविता वसुदेवात्मजो विभुः ।।
तदा तस्य[२] सुतो यः स्यात्सपतिस्ते भविष्यति ।। ४८

सा प्रणम्य ततो रुद्रमिति प्रोक्ता रतिस्ततः ।।
जगाम स्वेच्छया गत्या वसंतादि भिरन्विता ।। ४९

* ३ इति श्री स्कांदे...... कामदहनोनाम चतुर्विंशो/ध्यायः ।।

---

१ ब. यदि

२ ब. प्रतौ नास्ति । (तस्य)

* ३ अ. इति श्री स्कंद पुराणे कुमारिकाखंडे मदनदहनो नाम ।

ब. इति श्री स्कंद पुराणे कुमारिकाखंडे कामदहनो नाम चतुर्थविंशो/ध्यायः ।